## ६०. क्रीडा अपि आवश्यकी

लृट् / सम्बोधनम्

माता - पुत्र ! भवान् एवं सदा क्रीडति चेत् उत्तीर्णः न भविष्यति । ज्ञानमपि न प्राप्स्यति ।

अमरः - अम्ब ! किमर्थं तथा वदति ? अहं केवलं न क्रीडिष्यामि । अनन्तरं पठिष्यामि ।

माता - गृहसदस्याः सर्वे वदन्ति यत् भवान् सर्वदा क्रीडति । न पठिष्यति इति ।

अमरः - अहं सर्वदा क्रीडामि । किन्तु कदामि अनुत्तीर्णः न भविष्यामि । भवत्याः चिन्ता मास्तु । पश्यतु गतमासस्य परीक्षफलितांशम् ।

माता - वत्स ! एतत् अङ्कपत्रं भवतः एव वा ?

अमरः - सत्यम् अम्ब ! भवत्याः मयि विश्वासः नास्ति यतः सर्वदा अहं क्रीडिष्यामि इति ननु । कक्ष्यायाम् अहमेव प्रथमं स्थानं प्राप्तवान् ।

माता - अस्तु, इतः परं भवान् क्रीडतु । अहं चिन्तां न करिष्यामि एव ।

अमरः - अम्ब ! मम शिक्षकः वदति । जीवने पठनमेव प्रधानं न, क्रीडा अपि तदा तदा आवश्यकी । क्रीडति चेत् शक्तितवर्धनं भविष्यति, सदा मनः उल्लसितं भविष्यति । बुद्धिविकासः भविष्यति । अतः क्रीडा अपि प्रधाना इति ।

माता - भवतु पुत्र ! भवान् उत्तमः भवतु इत्येव मम आशयः ।